# २५. पादुका सहस्रम् - सन्निवेश पद्धतिः (२०)

अणोरणीयसीं विष्णो र्महतोऽपि महीयसीम् ।
प्रपद्ये पादुकां नित्यं तत्पदेनैव सम्मिताम् ॥ २५.१॥ ७८१॥

प्रतितिष्ठति पाद संमितायां
त्वयि नित्यं मणिपादुके मुकुन्दः ।
इतरे तु परिच्छदास्त एते
विभव व्यञ्जन हेतवो भवन्ति ॥ २५.२॥ ७८२॥

तव रङ्गनरेन्द्र पादरक्षे प्रकृतिः सन्नपि भक्ति पारतन्त्र्यात् ।
भवतीं वहतीव पन्नगेन्द्रः प्रथित स्वस्तिक लक्षणैः शिरोभिः ॥ २५.३॥ ७८३॥

परस्य पुंसः पदसन्निवेशान् प्रयुञ्जते भावित पञ्चरात्राः ।
अघ प्रतीपा नपदिश्य पुण्ड्रा नङ्गेषु रङ्गेशय पादुके त्वाम् ॥ २५.४॥७८४॥

विमृश्य रङ्गेन्द्रपतिं वरायाः श्रुतेः स्थितां मूर्धनि पादुके त्वाम् ।
बध्नन्ति वृद्धाः समये वधूनां त्वन्मुद्रिता न्याभरणानि मौलौ ॥ २५.५॥७८५॥

वहन्ति रङ्गेश्वर पादरक्षे दीर्घायुशां दर्शित भक्ति बन्धाः ।
आशाधिपाना मवरोधनार्य स्त्वन्मुद्रिकां मङ्गल हेमसूत्रैः ॥ २५.६॥ ७८६॥

व्यूहक्रमेण प्रथितार मग्रे सन्दर्शयन्तीं मणिपादुके त्वाम् ।
पातुं त्रिलोकीं पदपद्मभाजं सौदर्शनीं शक्तिमवैमि शौरेः ॥ २५.७॥ ७८७॥

बद्धासिका कनक पङ्कज कर्णिकायां
मध्ये कृशा मुररिपो र्मणिपादुके त्वम् ।
सन्दृश्यसे सरसिजासनया गृहीतं
रूपान्तरं किमपि रङ्ग विहार योग्यम् ॥ २५.८॥ ७८८॥

मानोचितस्य मदधीन जनस्य नित्यं
मा भूदतः कृपणतेति विचिन्तयन्त्या ।
बन्दीकृतं ध्रुवमवैमि वलग्नदेशे
कार्श्यं त्वया कमल लोचन पादरक्षे ॥ २५.९॥ ७८९॥

मध्ये कृशा मुभयतः प्रतिपन्न वृद्धिं
मन्ये समीक्ष्य भवतीं मणिपादरक्षे ।
नित्यं मुकुन्द पद सङ्गम विप्रयोगौ
निश्चिन्वते कृतधियः सुख दुःख काष्ठाम् ॥ २५.१०॥ ७९०॥

रङ्गेशितु श्चरण पङ्कजयो र्भजन्ती
रक्षा प्रसाधन विकल्प सहा मवस्थाम् ।
मान्याकृति र्निविशसे मणिपादरक्षे
मध्ये परिच्छद विभूषण वर्गयोस्त्वम् ॥ २५.११॥ ७९१॥

अङ्गान्तरेषु निहिता न्यखिलानि कामम् ।
पर्याय कल्पन सहानि विभूषणानि ।
नित्यं मुकुन्द पदपद्म तलानुरूपं
नैपथ्यमम्ब भवती नयनाभिरामम् ॥ २५.१२॥ ७९२॥

ये नाम भक्ति नियतै स्तव सन्निवेशं
निर्विश्य नेत्रयुगलै र्न भजन्ति तृप्तिम् ।
काल क्रमेण कमलेक्षण पादरक्षे
प्रायेण ते परिणमन्ति सहस्रनेत्राः ॥ २५.१३॥ ७९३॥

पदम प्रमाण मिति वादिनां मतं
मधुजित्पदे महति मास्म भूदिति ।
व्युदपादि तस्य चरणावनि त्वया
निगमात्मन स्तव समप्रमाणता ॥ २५.१४॥ ७९४॥

अप्रभूत मभवज्जगत्त्रयं यस्य मातु मुदितस्य पादुके ।
अप्रमेय ममितस्य तत्पदं नित्यमेव ननु सम्मितं त्वया ॥ २५.१५॥ ७९५॥

आलवाल मिव भाति पादुके पादपस्य भवती मधुद्विषः ।
यत्समीप विनतस्य शूलिनः सारणी भवति मौलिनिम्नगा ॥ २५.१६॥ ७९६॥

मोदमान मुनिवृन्द षट्पदा
भाति मुक्ति मकरन्द वर्षिणी ।
काऽपि रङ्गनृपतेः पदाम्बुजे
कर्णिका कनक पादुकामयी ॥ २५.१७॥ ७९७॥

युगप दनुविधास्यन् यौवतं तुल्यरागं
यदुपति रधिचक्रे यावतो रूपभेदान् ।
तदिद मति विकल्पं बिभ्रती सन्निवेशं
तव खलु पदरक्षे तावती मूर्ति रासीत् ॥ २५.१८॥ ७९८॥

तत्तद्वृत्ते रनुगुणतया वामनीं व्यापिनीं वा
प्राप्ते रङ्ग प्रथित विभवे भूमिकां सूत्रधारे ।
मन्ये विश्व स्थितिमय महानाटिकां नेतुकामा
नानासंस्था भवति भवती पादुके नर्तकीव ॥ २५.१९॥ ७९९॥

माने परं सामने प्रत्यक्षे णागमेनापि ।
हरिचरणस्य तवापि तु वैषम्यं रक्ष्यरक्षक त्वाभ्याम् ॥ २५.२०॥ ८००॥

इति कवितार्किक सिंहस्य सर्वतन्त्र स्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
श्रीमद्वेदान्ताचार्यस्य कृतिषु श्रीरङ्गनाथ पादुकासहस्रे
सन्निवेश पद्धतिः पञ्चविंशी ॥